चक्रस्तुतिः

दोषौघवारणं यस्य धारणं मोक्षकारणम् ।
न वैदिकं तच्चक्रधारणं यदि मन्यसे ॥ १॥

ग्रन्थादौ मङ्गलं तर्हि कस्मान्नावैदिकं तव ।
शिष्टाचारात्स्मृतिः कल्प्या स्मृतेश्च श्रुतिकल्पना ॥ २॥

यदि तत्र तथैतस्मिन्किन्न कल्पयसि श्रुतिम् ।
द्वारकायायिभिस्सर्वैरद्यापि प्राक्प्रवेशतः ॥ ३॥

निम्बादित्यानुगैः प्राज्ञैर्मायावाद्येकदेशिभिः ।
विष्णुस्वामिमतस्थैश्च रामानुजमताश्रयैः ॥ ४॥

तत्ववादिजनाचार्यैः शिष्टश्रेष्ठैरनुष्ठिते ।
कैश्चिच्चीर्णमिदं नोचेत्यक्तं तदपि नास्तिकैः ॥ ५॥

बहुशिष्टजनाचारः प्रमाणमुभयत्र च ।
स्वमूलग्रन्थभागेषु तथा प्रकरणेषु च ॥ ६॥

निबन्धेषु च सर्वेषु केनापीदं न दूषितम् ।
अनाचारस्तु केषाञ्चिदनाचारः प्रकल्प्यताम् ॥ ७॥

त्यजेदेकं कुलस्यार्थमिति न्यायं विजानत ।
नृसिंहपरिचर्यायां रामार्चाचन्द्रिकादिषु ॥ ८॥

श्रुतिस्मृतिपुराणोक्तया तैरपीदं प्रसाधितम् ।

न नः पूर्वैः पराक्रान्तं सर्वसम्प्रतिपत्तितः ॥ ९ ॥

इदानीमाग्रहादेव विवदन्ते क्वचित्क्वचित् ।
दुराग्रहग्रहं तेषां केषाञ्चिन्मनसि स्थितम् ॥ १० ॥

निवर्तयेत्सुप्रयुक्तः श्रौतो मन्त्रो महात्मभिः ।
अवैदिकमिदं चेत्ते ब्रह्मौक्यं वैदिकं कुतः ॥ ११ ॥

श्रुतयस्तत्र चेत्सन्ति न सन्ति किमिहागमाः ।
यद्येतेषामितोऽन्योऽर्थः कल्प्यते स्वकपोलतः ॥ १२ ॥

श्रुतिस्मृतिसमाख्यातस्तत्रान्यार्थो न किं श्रुतः ।
आग्रहोऽयं परेषां चेत्तथाऽयं किंतु नाग्रहः ॥ १३ ॥

वादिविप्रतिपन्नाभिः श्रौतत्वं तूभयोस्समम् ।
यद्यश्रौतमिदं कर्म यज्ञोऽश्रौतः कथं न ते ॥ १४ ॥

तन्मूलभूतवेदानामतत्वावेदकत्वतः ।
अन्यार्थकल्पनेनापि तत्ववेदकता गता ॥ १५ ॥

तेनैवावेदकत्वं चेदध्वरस्य कथं न तत् ।
अधुना बाधवैधुर्याद्व्यावहारिकमानता ॥ १६ ॥

समोभयत्र केषाञ्चिन्मते बाधोऽत्र तत्र च ।
वेदाप्रमाण्यशंसित्वादशिष्टौ तावुभावपि ॥ १७ ॥

व्यावहारिकमानत्वं मूढाप्रामाण्यमेव हि ।
अतश्चधारणं चेत्स्यात्तन्मूलेनैतदागतम् ॥ १८ ॥

सदा तदुक्तलाभार्थमिदं प्राज्ञैर्हिरण्मयी ।
पवित्रमुद्रेव कुशश्रुतिमूला प्रधार्यते ॥ १९ ॥

किमग्निनाऽपराद्धं ते किं चक्रेण मुरद्विषः ।
किं वा सद्भिरनिर्भीतैः किं पुराणैस्त्रयीगिरा ॥ २० ॥

निषेधवाक्याद्भीतिस्तु तश्चातश्चाङ्कयोस्समा ।
तत्सर्वं तश्चगं कुर्वन्समः स्वार्थपरार्थयोः ॥ २१ ॥

अमन्त्राहोममूलाङ्कविषयं कुरु लाघवात् ।
शिष्टाचारविरुद्धोऽर्थस्स्वसारं चाधिरोहति ॥ २२॥

इत्यादौ त्यज्यते वेदे किं पुनः स्मृतिकोणगः ।
यदि स्मृतिमनादृत्य श्रुतावनुदितत्वतः ॥ २३॥

विधिं न मानयस्येनं निषेधः केन मान्यते ।
नहि श्रुतिस्मृती धर्ममिमं क्वापि निषेधति ॥ २४॥

सुदर्शनकृतोद्योगनिष्कण्टकितपद्धतिः ।
तूष्णीं स्थितेऽपि लोकेऽस्मिन्नङ्गीकार इतीर्यते ॥ २५॥

शास्त्रेऽप्यप्रतिषिद्धं चेद्गीयतेऽनुमतं त्विति ।
यदि स्मृत्युक्तमाचारमश्रौतं मन्यते भवान् ॥ २६॥

शौचादौ दिग्विभागं च वैचित्र्यं मृत्तिकागृहे ।
योग्यायोग्यदिनत्वं च दन्तधावनकर्मणि ॥ २७॥

काष्ठे ग्राह्याग्राह्यतां च तथाऽऽचमनपद्धतिम् ।
गृह्योक्तं पार्वणविधिं भोज्याभिज्यपदार्थताम् ॥ २८॥

क्रमं षोडशसंस्कारे श्राद्धादीनां दिनान्यपि ।
तर्हि त्यक्त्वा व्रात्यदशामाश्रय त्वविशङ्कितः ॥ २९॥

सर्वधर्मान्परित्यज्येत्यादिवाक्यमुपाश्रितः ।
नारदीये बृहति ते बलं वाक्यचतुष्टयम् ॥ ३०॥

पाद्मगारुडमुख्येषु सन्त्यस्माकं सहस्त्रशः ।
द्वैधे बहूनां वचनमिति न्यायेन तत्यजन् ॥ ३१॥

अङ्गीकुरु हरेश्चक्रधृतिं मुक्तिसृतिं पराम् ।
अष्टादशपुराणस्थान्यस्मद्वाक्यानि सर्वशः ॥ ३२॥

मुख्यान्युपपुराणस्थवाक्येभ्यो न हि बिभ्यति ।
पञ्चरात्रस्य विष्णूक्तेः सर्वैः प्रामाण्यमिष्यते ॥ ३३॥

प्रतिष्ठापर्वपूजाद्या देवानां स्युः कथं न चेत् ।
श्रुतिप्रतीकं संगृह्य पवित्राख्यां प्रदाय च ॥ ३४॥

तत्र प्रथमसंस्कारस्तप्तचक्राङ्क ईर्यते ।
तद्विरुद्धमृषिप्रोक्तं दुरुक्तमिति गृह्यते ॥ ३५॥

उभयोः कलहे साक्षी विजातीयो हि मान्यते ।
यच्छास्त्रं लिङ्गपारम्यं परं देवमुमापतिम् ॥ ३६॥

तमः प्रवर्तकं वक्ति तामसं तत्प्रचक्षते ।
इति गारुडवाक्येन तथा पाद्मगतेन च ॥ ३७॥

विष्ण्वाधिक्यविरोधित्वे पुराणस्मृतिविद्ययोः ।
अपि तामसतैवोक्ता ततोऽप्यन्यदुपेक्षताम् ॥ ३८॥

नहि तामसमाश्रित्य तमः प्रासुं त्वमर्हसि ।
श्रीमद्भागवतं सर्वैः पूर्वैर्नो भवतामपि ॥ ३९॥

पुराणेषूत्तमत्वेन श्रुतं मतमुपाश्रितम् ।
तत्रापि विष्णुमाहात्म्यरसायनविरोधिनाम् ॥ ४०॥

शैवोक्तिविषबिन्दूनां तामसत्वमुदाहृतम् ।
वाचं हीनां मया रक्षन् दुःखदुःखी भवेदिति ॥ ४१॥

शृण्वन्ति येऽन्यविषयाः कुकथा मतिनाशिनीः ।
ते तमः प्राप्नुवन्तीति वन्ध्यां न बिभृयाद्गिरम् ॥ ४२॥

इत्यादौ तेन चोक्तं नः सर्वं चार्वेव गम्यते ।
मल्लक्षणमिमं कायं कृत्वा मद्धर्ममाश्रितः ॥ ४३॥

स्वलिङ्गधारणेनेति तत्रोक्तं चक्रलाञ्छनम् ।
श्रुतितात्पर्यसिद्धेऽर्थे विरोधं कुर्वती स्मृतिः ॥ ४४॥

विरोधे त्वनपेक्षं स्यादित्यमानत्वमेष्यति ।
पवित्रं त इति ह्येका गोविन्दुर्बिभ्रदायुधम् ॥ ४५॥

येन देवाः पवित्रेण आत्मानं पुनन्ते सदा ।

तेन सहस्रधारेण पावमान्यः पुनन्तु माम् ॥ ४६॥

इत्याद्यपि यजुर्वेदे लोकस्य द्वारमित्यपि ।
चरणं पूतमिति च तथा साम्नि स्फुटं वचः ॥ ४७॥

नेमिना तप्तसुतनुः सायुज्यं प्राप्नुयादिति ।
उरुक्रमाङ्किः सुभगा वयमेभिरिहाङ्किताः ॥ ४८॥

इत्यथर्वगतं वाक्यं तथा श्रुतिशिरस्यपि ।
अद्यापि गौर्जरैर्विप्रैः पठ्यमाने गुरोर्मुखात् ॥ ४९॥

धृतोर्ध्वपुण्ड्रः श्रितसच्चक्रधारी हरिं परम् ।
यो ध्यायेत्स महात्मेति स्पष्टमर्थान्तरोज्झितम् ॥ ५०॥

सन्ति स्मृतीतिहासाध्याः पुराणानि च कोटिशः ।
सुदर्शनस्य मीमांसा कृता ह्यस्मत्पुरातनैः ॥ ५१॥

तत्रोद्धृतेषु वाक्येषु कथमेतेषु संशयः ।
यदि वाक्यं स्वयं कृत्वा प्रावक्ष्यन्पूर्वसूरयः ॥ ५२॥

तर्ह्यर्च्यनेकभेदायां कुतो वाक्यं निजेच्छया ।
नाकरिष्यन्नतिस्पष्टमनर्थान्तरसम्भवम् ॥ ५३॥

प्रावर्तन्त कथं पूर्वे सर्वेऽप्यास्तिकमौलयः ।
सृष्टैर्वाक्यैर्न चेत्सर्वविस्रवः स्याज्जिनोक्तितः ॥ ५४॥

स वक्ति सर्वमाम्नायं रक्षसा केनचित्कृतम् ।
पवित्रं चरणं चक्रं लोकद्वारं सुदर्शनम् ॥ ५५॥

पर्यायवाचका ह्येते चक्रस्य परमात्मनः ।
पुराणोक्तिरियं चक्रं पवित्राद्याख्ययाऽऽह हि ॥ ५६॥

मर्त्यानुशासनं ग्राह्यं किं पुनः स्मार्तशासनम् ।
पवित्रायते लोकानिति व्युत्पत्तिसम्भवात् ॥ ५७॥

योगरूढिबलायाता पवित्राख्या सुदर्शने ।
इमां श्रुतिमुपादाय पुराणान्येव सर्वशः ॥ ५८॥

प्रमाणयन्ति स्वोक्तेऽस्मिंस्तप्तचक्राङ्कधारणे ।
अतोऽन्यार्थः श्रुतेरस्याः कथं शक्यो मनीषिभिः ॥ ५९ ॥

सति नेतरि मार्गस्य किमन्धोक्तः क्रमो भवेत् ।
पवित्रपदनिदिष्टमर्थं वेदस्तमेव हि ॥ ६० ॥

सहस्रधारनामोक्तया चक्रत्वं स्पष्टयत्यहो ।
षड्कोणत्वाभिधां चक्रच्छायामद्याप्युपाददत् ॥ ६१ ॥

कुशग्रन्थिरपि ह्यासीत्पवित्राख्यो महीतले ।
यथा चित्रस्थसिंहस्य सिंहसादृश्यमात्रतः ॥ ६२ ॥

सिंहतायां मुख्यसिंहो वन्य एवेति निर्णयः ।
तथा पवित्रनामैतच्चक्रस्यैवेति गम्यते ॥ ६३ ॥

षड्कोणता सर्वमते चक्रस्यैव हि लक्षणम् ।
आगमोक्तं पवित्रं च षड्कोणग्रन्थितोऽभवत् ॥ ६४ ॥

अतोऽन्यार्थकथा वाताहता शुष्कलताऽभवत् ।
तत्पवित्रमिदं व्याप्तं यत्वं पर्येपि विश्वतः ॥ ६५ ॥

इति श्रुत्युदितं विष्णुव्याप्त्या व्याप्तत्वमेव च ।
चक्रस्यैवोचितं विप्रकुशस्यात्यन्तबाधितम् ॥ ६६ ॥

प्राक्प्रसक्तपवित्रेण तप्ततप्तत्वमिष्यते ।
पञ्चाग्निकृततापोक्तौ दूषणद्वयमागतम् ॥ ६७ ॥

प्रसक्तस्य परित्यागो ह्यप्रसक्तपरिग्रहः ।
आमत्वोक्त्या तप्तचक्रदाहाभावो हि दूष्यते ॥ ६८ ॥

अग्निदूरसमीपस्थवस्तुन्यामत्वसाम्यतः ।
शृतास इति शब्दार्था दाहवन्तो न तापसाः ॥ ६९ ॥

पादोक्तौ स्यात्पवित्रेणेत्येतद्वयर्थं पदान्तरम् ।
चक्रं प्रयुज्य निबिडं तमो निर्भिद्य रन्ध्रातः ॥ ७० ॥

अनन्तासनलोकं स्वं प्राप कृष्णः सहार्जुनः ।
इति पौराणिकख्यात्या लोकस्य द्वारताऽपि च ॥ ७१॥

चक्रस्यैवोचिताऽनन्यत्र शक्योऽतोऽर्थो न शङ्कितुम् ।
अपि चार्थद्वये प्राप्ते समाख्यैकार्थसाधिका ॥ ७२॥

तत्पुराणसमाख्यानादर्थेऽयमवधार्यते ।
मीमांसाभिधविख्यातसीमासाम्राज्यकारिभिः ॥ ७३॥

यद्यप्याम्नायमार्गेऽस्मिन्वक्तुं बहु च शक्यते ।
तथाऽप्यल्परणोद्योगे योद्धुः शूरस्य नोचितम् ॥ ७४॥

महाप्राकारकरणमिति मत्वोपरम्यते ।
कुमतध्वान्तनिर्भेदी स्वमताम्भोधिसम्भ्रमः ॥ ७५॥

हयग्रीवोल्लसच्चन्द्रपादः खेदापहोऽस्तु नः ।
हयग्रीवपदद्वन्द्वचिन्तनासक्तचेतसा ।
यतिना वादिराजेन चक्रस्तुतिरियं कृता ॥ ७६॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

चक्रस्तुतिः सम्पूर्णा

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु